No. of Printed Pages/Questions: 7/ 17

# O. P. JINDAL SCHOOL, SAVITRI NAGAR

**Half Yearly Examination (2023 – 2024)**

**Class: VI** **MM: 80**

**Subject: Sanskrit** **Time: 3. Hrs.**

Name: ______________________ Class / Section: ________ Roll No.:__________

***Fifteen Minutes Extra will be for reading the Question Paper.***

निर्देशाः1) प्रश्नपत्रे चत्वारि खण्डानि सन्ति।

खण्ड क अपठित अवबोधनम् (10 अङ्काः)
खण्ड ख रचनात्मकं कार्यम् (15 अङ्काः)
खण्ड ग अनुप्रयुक्त व्याकरणम् (25 अङ्काः)
खण्ड घ पठित–अवबोधनम् (30 अङ्काः)

2) सर्वे प्रश्नाः अनिवार्याः।
3) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।
4) प्रश्न संख्या अवश्यं लेखनीयाः।
5) उत्तराणि संस्कृतेन एव लेखनीयानि।

## खण्ड 'क' अपठित–अवबोधनम्

**प्र01 निम्नलिखितं गद्यांशं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत–**

( निम्नलिखित गद्यांश को पढ़कर निर्देशानुसार प्रश्नों के उत्तर दीजिए )

रामपुरः एकः ग्रामः अस्ति। ग्रामे अनेके जनाः निवसन्ति। ग्रामे कृषकाः, चिकित्सकाः, तक्षकाः कुम्भकाराः च वसन्ति । अत्र एकः विद्यालयः अस्ति। विद्यालये छात्राः पठन्ति। अत्र एका वाटिका अपि अस्ति। वाटिकायां वानराः भ्रमन्ति खगाः च कूजन्ति।

**I एकपदेन उत्तरत–** **(1X2=2)**

i वानराः कुत्र भ्रमन्ति ?
ii छात्राः कुत्र पठन्ति ?

**II एकवाक्येन उत्तरत–** **(2X2=4)**

i ग्रामे के के निवसन्ति ?
ii खगाः किं कुर्वन्ति ?

**III यथानिर्देशम् उत्तरत–** **(1x3=3)**

i धातुम् लिखत– (क) भ्रमन्ति ............................
(ख) कूजन्ति ............................

ii विभक्तिम् लिखत– (क) तक्षकाः ............................
(ख) वाटिकायाम् ........................

iii 'वाटिका' इति पदस्य लिंगम् किम् ?

(क) पुल्लिंग (ख) स्त्रीलिंग

(ग) नपुंसकलिंग (घ) इनमें से कोई नहीं

IV *गद्यांश के लिए एक उचित शीर्षक लिखिए।* **(1X1=1)**

## खण्ड–'ख' रचनात्मकं–कार्यम्

**प्र02 अधोदत्तंचित्रं दृष्ट्वा मंजूषायां सहायतया पंचवाक्येषु वर्णनं कुरुत–**

( चित्र को देखकर मंजूषा की सहायता से पाँच वाक्यों में वर्णन कीजिए ) **(1X5=5)**

| गृहस्य, पितामहः,गृहे, पितामही, नमति, दुग्धम्, जनकः, आनयति, समाचार पत्रं, क्रीडनकेन, बालः |
|---|



**प्र0 3 संस्कृत वाक्यानाम् हिंदी भाषायाम् अनुवादं कुरुत–** (कोई पाँच) **(1X5=5)**

( निम्नलिखित किन्हीं **पाँच** वाक्यों का हिंदी भाषा में अनुवाद कीजिए )

i नम्रता पुस्तकं पठति।

ii वृक्षाः वनं रचयन्ति।

iii अहम् रोटिकां खादामि।

iv जनाः अत्र पर्यटनाय आगच्छन्ति।

v श्रमिका खनित्रम् चालयति।

vi वृक्षाः पवनं पिबन्ति।

vii तव नाम किम् ?

प्र0 4 भिन्नप्रकृतिकं पदं चिनुत–( भिन्न शब्द को छाँटिए ) (1X5=5)

| | | | | |
|---|---|---|---|---|
| i | आम्रम्, | कदलीफलम् | मोदकम् | नारंगम् |
| ii | शुकः, | राज्ञः, | कपोतः, | मयूरः। |
| iii | गंगा, | लता, | यमुना, | नर्मदा। |
| iv | लेखनी, | तूलिका, | चटका, | पाठशाला। |
| v | उद्यानम्, | कुसुमम्, | फलम्, | चित्रम्। |

## खण्ड– 'ग' अनुप्रयुक्तव्याकरणम्

प्र0 5 **(I) वर्ण–संयोजनंकुरुत–** (वर्णों को जोड़कर लिखिए) **(1X3=3)**

i च् + अ + ष् + अ + क् + अः

ii क् + अ + द् + अ + ल् + ई

iii घ् + अ + ट् + इ + क् + आ

**(II) वर्णानां क्रमानुसारं लिखत–** (उचित क्रम में लिखिए) **(1X2=2)**

i छ, झ, च, ञ, ज

ii ध, द, न, त, थ

प्र0 6 **मंजूषातः रूपाणि चित्वा शब्दरूपं पूर्तिं कुरुत–** (शब्दरूप लिखिए) **(½X10=5)**

बालाभ्यः ,बालाभ्याम्, बालायाः, बालानाम्,बालाभिः,हे बाले!, बाला,बालायाः,बालाभ्याम्,बालायाम्

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | 1 ----- | बाले | बालाः |
| द्वितिया | बालाम् | बाले | बालाः |
| तृतीया | बालया | बालाभ्याम् | 2 ----- |
| चतुर्थी | बालायै | 3 ----- | बालाभ्यः |
| पंचमी | 4 ----- | 5 ----- | 6 ----- |
| षष्ठी | 7 ----- | बालयोः | 8 ----- |
| सप्तमी | 9 ----- | बालयोः | बालासु |
| सम्बोधनं | 10 ----- | हे बाले! | हे बाला ! |

प्र0 7 धातुरूप– गम्, खेल् धातौः लट्लकारे रूपाणि लिखत – (1X3=3)
('गम्' और 'खेल्' धातु के लट्लकार में रूप लिखिए।)

प्र0 8 कोष्ठकात् उचितंपदं चित्वा रिक्तस्थानानि पूरयत– (1X5=5)

i एतत् ——— पुस्तकम् अस्ति। ( मम् / मम )

ii एषा ——— लेखनी अस्ति । ( तव / त्वाम )

iii छात्रः ——— पश्यति। (दूरदर्शनं / दूरदर्शने)

iv ——— कुत्र गच्छथः ? ( युवाम् / यूयम् )

v ——— पत्रं लिखामि। ( वयम् / अहम् )

प्र0 9 मंजूषातः उचितम् अव्ययपदं चित्वा लिखत– (1X5=5)

| सर्वदा, कुत्र, तदा, अद्य, सर्वत्र |
|---|

i यदा बालः हसति ——— जनकः हसति।

ii ——— शनिवासरः अस्ति।

iii मीनः ——— तरति ?

iv ईश्वरः ——— अस्ति।

v सा ——— सत्यम् वदति।

प्र0 10 पर्ययानां समुचितं मेलनं कुरुत – (पर्यायवाची को मिलाइए) (½X4=2)

| | | | |
|---|---|---|---|
| (1) | पक्षी | (क) | छगलः |
| (2) | मेघः | (ख) | जननी |
| (3) | माता | (ग) | खगः |
| (4) | अजः | (घ) | जलदः |

## खण्ड–'घ' पठित–अवबोधनम्

**प्र0 11 निम्नलिखितं गद्यांशं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत–**

एषः समुद्रतटः। अत्र जनाः पर्यटनाय आगच्छन्ति। केचन तरङ्गैः क्रीडन्ति। केचन च नौकाभिः जलविहारं कुर्वन्ति। तेषु केचन कन्दुकेन क्रीडन्ति। बालिकाः बालकाः च बालुकाभिः बालुकागृहं रचयन्ति। मध्ये–मध्ये तरङ्गाः बालुकागृहं प्रवाहयन्ति। एषा क्रीडा प्रचलति एव। समुद्रतटाः न केवलं पर्यटनस्थानानि। अत्र मत्स्यजीविनः अपि स्वजीविकां चालयन्ति।

**I एकपदेन उत्तरत–** **(1X2=2)**

i अत्र जनाः किमर्थम् आगच्छन्ति ?

ii जनाः काभिः जलविहारं कुर्वन्ति ?

**II पूर्णवाक्येन उत्तरत–** **(2X1=2)**

i बालकाः बालुकाभिः किं रचयन्ति ?

**III निर्देशानुसारम् उत्तरत–** **(1X2=2)**

i 'तरङ्गैः' इति पदस्य कः अर्थः ?

**क)** लहरों से **ख)** चलाते हैं **ग)** खेलते हैं

ii 'पर्यटनाय' इति पदे का विभक्ति ?

**क)** तृतीया **ख)** चतुर्थी **ग)** पंचमी

**प्र0 12 अधोलिखितं पद्यांशं ध्यानेन पठित्वा उत्तराणि लिखत–**

स्पृशन्ति पादैः पातालं च।
नभः शिरस्सु वहन्ति वृक्षाः।।
पयोदर्पणे स्वप्रतिबिम्बम्।
कौतुकेन पश्यन्ति वृक्षाः ।।
प्रसार्य स्वच्छायासंस्तरणम्।
कुर्वन्ति सत्कारं वृक्षाः ।।

**I एकपदेन उत्तरत–** **(1X2=2)**

i वृक्षाः कैः पातालम् स्पृशन्ति ?

ii कौतुकेन वृक्षाः किं पश्यन्ति ?

II **पूर्णवाक्येन उत्तरत–** (2X1=2)

i वृक्षाः कथम् सत्कारं कुर्वन्ति ?

III **निर्देशानुसारम् उत्तरत–** (1X2=2)

i 'वहन्ति' इति क्रिया पदस्य कर्ता पदं किम् ?

**क)** प्रसार्य **ख)** वृक्षाः **ग)** शिरस्सु

ii 'आकाशः' इति पदस्य पर्यायवाची पदं किम् ?

**क)** छायाः **ख)** नभः **ग)** पातालं

**प्र0 13 अधोलिखितं नाट्यांशं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत–**

**शिक्षिका** – छात्राः! यूयं किं कुरुथः ?

**छात्राः** – आचार्ये! वयं गच्छामः।

**शिक्षिका** – यूयं कुत्र गच्छथ ?

**छात्राः** – वयं सभागारं गच्छामः।

**शिक्षिकाः** – युष्माकं पुस्तकानि कुत्र सन्ति ?

**छात्राः** – अस्माकम् पुस्तकानि अत्र सन्ति।

I **एकपदेन उत्तरत–** (1X2=2)

i अत्र का प्रश्नं पृच्छति ?

ii युष्माकं कानि कुत्र सन्ति ?

II **पूर्णवाक्येन उत्तरत–** (2X1=2)

i छात्राः कुत्र गच्छन्ति स्म ?

III **निर्देशानुसारम् उत्तरत –** (1X2=2)

i 'शिक्षिका' इति पदस्य पर्यायपदं किम् ?

**क)** आचार्या **ख)** छात्राः **ग)** सन्ति

ii 'कुत्र' अव्यय पदस्य कः अर्थः?

**क)** जहाँ **ख)** वहाँ **ग)** कहाँ

प्र0 14 संख्यावाचिपदेन मंजूषातः रिक्तस्थानानि पूरयत– (½X6=3)

| |
|---|
| द्वे, चतस्त्रः, एका, चत्वारि, द्वौ, एकः |

i वने (2) ––––– **गजौ** भ्रमतः।

ii (4)–––––– **महिलाः** जलम् आनयन्ति।

iii वृक्षात् (4)–––––– **पत्राणि** पतन्ति।

iv (1)–––––– **लेखनी** अत्र अस्ति।

v आकाशे (1) ––––– **चन्द्रः** अस्ति।

vi पुष्पे (2) ––––– **मक्षिके** उड्डयतः।

प्र0 15 विपर्यान् मेलयत – ( विलोम पदों को मिलाइए ) (½X6=3)

| | |
|---|---|
| (1) मधुरः | (क) कृशः |
| (2) दिवसः | (ख) अलसः |
| (3) उपरि | (ग) कटु |
| (4) उद्यमी | (घ) बुद्धिहीनः |
| (5) स्थूलः | (ङ) अधः |
| (6) बुद्धिमान् | (च) निशा |

प्र0 16 एकवचनस्य बहुवचनम्, बहुवचनस्य एकवचनम् च लिखत– (½X4=2)

i त्वम् ––––––––––

ii एतानि ––––––––––

iii सः ––––––––––

iv अस्माकम् ––––––––––

प्र0 17 निर्देशानुसारं वचन परिवर्तनं कुरुत– (वचन बदलिए) (1X4=4)

i अहम् पठामि। – (बहुवचने)

ii मयूरः नृत्यति। – (बहुवचने)

iii एतानि यानानि। – (द्विवचने)

iv नारिकेलं पतति। – (द्विवचने)

––00––